# आदर्शपाठयोजना (2023-24)
# (संस्कृत-पद्यशिक्षणम्)

| | | |
|---|---|---|
| **विषयः - संस्कृतम्** | **कालांशः - चतुर्थः** | **कक्षा - दशमीं** |
| **पाठस्य नाम - "सुभाषितानि"** | **अवधिः - 40 निमेषाः** | **दिनाङ्कः - 28.03.23** |

## 1. अधिगमस्य प्रतिफलानि –

i. छात्रेषु संस्कृतकाव्यं प्रति रुच्युत्पादनम्।
ii. छात्रेषु कोमलभावानां विकासकरणम्।
iii. छात्रेषु संस्कृतपद्यांशस्य अर्थग्रहणक्षमतायाः विकासकरणम्।
iv. छात्रेषु श्रवणस्य भाषणस्य पठनस्य लेखनस्य चेतेषां चतुर्णां भाषिककौशलानां विकासकरणम्।
v. छात्राणां शब्दभण्डारस्य अभिवर्द्धनम्।
vi. छात्रेषु लिपिज्ञानवर्द्धनम्।
vii. छात्रेषु पद्यगतभावानाम् अवबोधनक्षमतायाः विकासः।

## 2. अनुदेशात्मकानि उद्देश्यानि –

### ज्ञानात्मकपक्षः –

i. **'सुभाषितानि'** माध्यमेन छात्राः संस्कृतशब्दार्थान् ज्ञात्वा तेषां प्रयोगे समर्थाः भविष्यन्ति।
ii. सुभाषितपद्येषु निहितं भावं स्वजीवने प्रयुक्तं करिष्यन्ति।

### बोधात्मकपक्षः –

i. छात्राणां सुभाषितपद्यानां माध्यमेन धार्मिकप्रवृत्तिं प्रति सकारात्मकाभिवृद्धेः जागरणम्।
ii. छात्राः विभिन्नसूक्तीनां माध्यमेन ज्ञास्यन्ति यद् आलस्यं मनुष्याणां शरीरस्थः महान् रिपु अस्ति।

### प्रयोगात्मकपक्षः –

i. छात्राः सुभाषितपद्येषु निहितं भावं निजजीवने प्रयुज्य स्वचरित्रनिर्माणं करिष्यन्ति।
ii. ते स्वजीवने आलस्यं त्यक्त्वा परिश्रमं करिष्यन्ति सफलाः च भविष्यन्ति।

### सृजनात्मकपक्षः –

i. छात्रेषु संस्कृतपद्यानाम् अर्थग्रहणक्षमतायाः विकासः भविष्यति।
ii. सुभाषितपद्यानां माध्यमेन ते स्वजीवनं रसमयम् आनन्दमयं च करिष्यन्ति।

## 3. शिक्षणविधयः -

व्याख्यानविधिः        वर्णनविधिः
प्रश्नोत्तरविधिः        विश्लेषणविधिः

## 4. शिक्षणाधिगमसामग्री -

शयामपट्टः        सुधाखण्डः        मार्जनी
पाठ्यपुस्तकम्        सङ्केतकः

## 5. पूर्वज्ञानानुमानम् -

छात्राः सुभाषितपद्यानां विषये पूर्वमेव किञ्चित् जानन्ति एव।

## 6. पूर्वज्ञानपरीक्षणम्

| अध्यापकस्य क्रियाः | छात्राणां क्रियाः |
|---|---|
| 1. कथनस्य अर्थे कः धातुः प्रयुज्यते?<br>2. सु + भाष् + क्त योजने किं भवति?<br>3. **"सुभाषितम्"** इत्यस्य नपुंसकलिङ्गे बहुवचने किं रूपं भवति? | कथ् , वद् , भाष्<br>सुभाषितम्<br>छात्राः निरुत्तराः (समस्यात्मकः प्रश्नः) |

## 7. उद्देश्यकथनम् -

अद्य वयं **"सुभाषितानि"** इत्यस्य पाठस्य अध्ययनं करिष्यामः।

## 8. प्रस्तुतीकरणम् -

| शिक्षणबिन्दवः | अध्यापकस्य क्रियाः | छात्राणां क्रियाः | श्यामपट्टकार्यम् |
|---|---|---|---|
| आदर्शवाचनम् | मूलपाठस्य सस्वरगानं करिष्यति।<br>1. आलस्यं हि ........... नावसीदति।<br>2. सेवितव्यो ........... निवार्यते। | छात्राः ध्यानेन शृण्वन्ति। | पाठ-6, "सुभाषितानि" |
| अनुकरणवाचनम् | अध्यापकः छात्रान् समुचितरूपेण गति-यति-लयानुसारं पद्यस्य अनुवाचनं कर्तुं कथयिष्यति। | छात्राः निर्देशानुसारं पद्यस्य अनुवाचनं कुर्वन्ति। | |
| अशुद्धेः संशोधनम् | अध्यापक अनुवाचनसमये छात्रै उच्चारितानाम् अशुद्धशब्दानां संशोधनं छात्राणां सहायतया श्यामफलके लिखित्वा वाचयित्वा च करिष्यति। | छात्राः शुद्धशब्दानाम् अनुवाचनं कृत्वा उत्तरपुस्तिकायां स्वप्रतिलेखस्योपरि लिखन्ति। | निवार्यते<br>नासत्युद्यमसमो |

| | | | |
|---|---|---|---|
| **काठिन्यनिवारणम्** | अध्यापकः पद्येषु विद्यमानानां कठिनपदानां क्रमेणार्थावबोधनं कारयिष्यति । श्यामफलके अपि सन्धिच्छेदं कृत्वा लेखिष्यति।<br><br>अध्यापकः कक्षायां भ्रमित्वा छात्राणां सहभागितां सुनिश्चितां करिष्यति लिखितकार्यस्य च निरीक्षणं करिष्यति। | छात्राः ध्यानेन स्वप्रतिलेखस्योपरि लिखन्ति। | **नासत्युद्यमसमः** = न + अस्ति +उद्यमसमः (परिश्रमेण तुल्यं नास्ति कश्चिदपि)<br>**निवार्यते** = अवरुध्यते<br>**नावसीदति** = न + अवसीदति - दुःखस्य अनुभवो न भवति |
| **बोधप्रश्नाः** | 1. केषां महान् रिपु आलस्यम्?<br>2. केन समः बन्धुः नास्ति?<br>3. सेवितव्यः कः?<br>4. दैवात् किं नास्ति?<br>5. का न निवार्यते? | 1. मनुष्याणाम्<br>2. उद्यमेन<br>3. महावृक्षः<br>4. फलम्<br>5. छाया | |
| **मौनवाचनम्** | अध्यापकः छात्रान् पद्यानां मौनवाचनं कर्तुं कथयिष्यति। | छात्राः मौनवाचनं करिष्यन्ति। | |
| **भाषानुवादः** | **श्लोकः 1-** मनुष्य के शरीर में रहने वाला आलस्य ही मनुष्य का सबसे बड़ा शत्रु है। परिश्रम के समान कोई मित्र नहीं है, क्योंकि परिश्रम करके मनुष्य कभी भी दुःखी नहीं होता है।<br><br>**श्लोकः 2-** हमें फल और छाया से युक्त किसी महान् वृक्ष की सेवा करनी चाहिए। दुर्भाग्य से यदि उस वृक्ष पर फल नहीं लगते हैं, तो छाया को कौन रोक सकता है? अर्थात् छाया को कोई नहीं रोक सकता। | छात्राः ध्यानेन शृण्वन्ति अवगच्छन्ति च। | |
| **9. पुनरावृत्तिकार्यम् –**<br><br>प्रश्नः 1. केन समः बन्धुः नास्ति?<br>प्रश्नः 2. नराणां प्रथमः शत्रुः कः?<br>प्रश्नः 3. अस्माभिः कीदृशः वृक्षः सेवितव्यः?<br><br>प्रश्नः 4. **“सुभाषितानि”** शब्दस्य अर्थः कः?<br>प्रश्नः 5. महावृक्षः कथं सेवितव्यः? | | 1. उद्यमेन समः बन्धुः नास्ति।<br>2. देहस्थितः क्रोधः।<br>3. अस्माभिः फलच्छाया-समन्वितः महावृक्षः सेवितव्यः।<br>4. शोभनानि वचनानि।<br>5. यदि दैवात् फलं नास्ति तर्हि छाया केनापि न निवार्यते। अतएव महावृक्षः सेवितव्यः। | |

## 10. गृहकार्यम् -

1. उद्यमस्य महत्त्वम् इति वर्णयन्तः द्वौ श्लोकौ लिखित्वा तयोः भावार्थं स्वभाषया लिखत।
2. परिश्रमस्य महत्त्वम् इत्यस्मिन् विषये पञ्चवाक्यानि लिखत।
3. प्रदत्तशब्दानां पर्यायपदानि पाठात् चित्वा लिखत - शत्रुः, मित्रम्, वृक्षः ।
4. सन्धिच्छेदं कुरुत - फलच्छायासमन्वितः, नास्ति, नास्त्युद्यमसमः, नावसीदति।
5. '**निवार्यते**' अत्र क उपसर्गः?
6. प्रकृतिप्रत्ययौ लिखत - सेवितव्यः, कृत्वा।

## सन्दर्भः –

**"सुभाषितानि"** अयं पाठः हरियाणा-विद्यालय-शिक्षा-बोर्डतः प्रमाणितात् दशम्याः कक्षायाः '**शेमुषी भाग-2**' पाठ्यपुस्तकाद् उद्धृतः।